# tattvabodhaH

# તત્ત્વબોધઃ અઙ્કિત

## Document Information

Text title : tattvabodha

File name : tattvabodharearranged.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Upanishad Brahmendra (Ramachandrendra Sarasvati)(?)

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Renumbered and arranged

Latest update : Sept. 22, 2010, November 25, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# તત્ત્વબોધઃ અઙ્કિત

૧.૦ સાધનચતુષ્ટયમ્
૨.૦ તત્ત્વવિવેકઃ
૩.૦ શરીરત્રયમ્
૪.૦ જ્ઞાનેન્દ્રિયાણિ
૫.૦ કર્મેન્દ્રિયાણિ
૬.૦ અવસ્થાત્રયમ્
૭.૦ પઞ્ચકોશાઃ
૮.૦ આત્મન્
૯.૦ ચતુર્વિંશતિતત્ત્વોત્પત્તિપ્રકારમ્
૧૦.૦ જીવેશ્વર ભેદબુદ્ધિ
૧૧.૦ જીવેશ્વરૈક્ય
૧૨.૦ જીવન્મુક્તિઃ
૧૩.૦ કર્માણિ

---

વાસુદેવેન્દ્રયોગીન્દ્રં નત્વા જ્ઞાનપ્રદં ગુરુમ્ ।
મુમુક્ષૂણાં હિતાર્થાય તત્ત્વબોધોઽભિધીયતે ॥

---

સાધનચતુષ્ટયસમ્પન્નાધિકારિણાં મોક્ષસાધનભૂતં
તત્ત્વવિવેકપ્રકારં વક્ષ્યામઃ ।

૧.૦ સાધનચતુષ્ટયમ્

સાધનચતુષ્ટયં કિમ્ ?

૧.૧ નિત્યાનિત્યવસ્તુવિવેકઃ ।
૧.૨ ઇહામુત્રાર્થફલભોગવિરાગઃ ।
૧.૩ શમાદિષટ્કસમ્પત્તિઃ ।
૧.૪ મુમુક્ષુત્વં ચેતિ ।

### ૧.૧.૧ વિવેકઃ

નિત્યાનિત્યવસ્તુવિવેકઃ કઃ ?
નિત્યવસ્ત્વેકં બ્રહ્મ તદ્વ્યતિરિક્તં સર્વમનિત્યમ્ ।
અયમેવ નિત્યાનિત્યવસ્તુવિવેકઃ ।

### ૧.૧.૨ વૈરાગ્યમ્

વિરાગઃ કઃ ?
ઇહસ્વર્ગભોગેષુ ઇચ્છારાહિત્યમ્ ।

### ૧.૧.૩ શમાદિસાધનસમ્પત્તિઃ કા ?

શમો દમ ઉપરમસ્તિતિક્ષા શ્રદ્ધા સમાધાનં ચ ઇતિ ।

#### ૧.૧.૩.૧ શમઃ

શમઃ કઃ ?
મનોનિગ્રહઃ ।

#### ૧.૧.૩.૨ દમઃ

દમઃ કઃ ?
ચક્ષુરાદિબાહ્યેન્દ્રિયનિગ્રહઃ ।

#### ૧.૧.૩.૩ ઉપરમઃ

ઉપરમઃ કઃ ?
સ્વધર્માનુષ્ઠાનમેવ ।

#### ૧.૧.૩.૪ તિતિક્ષા

તિતિક્ષા કા ?
શીતોષ્ણસુખદુઃખાદિસહિષ્ણુત્વમ્ ।

#### ૧.૧.૩.૫ શ્રદ્ધા

શ્રદ્ધા કીદૃશી ?
ગુરુવેદાન્તવાક્યાદિષુ વિશ્વાસઃ શ્રદ્ધા ।

#### ૧.૧.૩.૬ સમાધાનમ્

સમાધાનં કિમ્ ?
ચિત્તૈકાગ્રતા ।

૧.૪ મુમુક્ષુત્વમ્

મુમુક્ષુત્વં કિમ્ ?

મોક્ષો મે ભૂયાદ્ ઇતિ ઇચ્છા ।

એતત્ સાધનચતુષ્ટયમ્ ।

તતસ્તત્ત્વવિવેકસ્યાધિકારિણો ભવન્તિ ।

૨.૦ તત્ત્વવિવેકઃ

૨.૧ તત્ત્વવિવેકઃ કઃ ?

આત્મા સત્યં તદન્યત્ સર્વં મિથ્યેતિ ।

૨.૨ આત્મા કઃ ?

સ્થૂલસૂક્ષ્મકારણશરીરાદ્વ્યતિરિક્તઃ પઞ્ચકોશાતીતઃ
સન્ અવસ્થાત્રયસાક્ષી સચ્ચિદાનન્દસ્વરૂપઃ સન્
યસ્તિષ્ઠતિ સ આત્મા ।

૩.૦ શરીરત્રયમ્

૩.૧ સ્થૂલશરીરં કિમ્ ?

પઞ્ચીકૃતપઞ્ચમહાભૂતૈઃ કૃતં સત્કર્મજન્યં
સુખદુઃખાદિભોગાયતનં શરીરમ્
અસ્તિ જાયતે વર્ધતે વિપરિણમતે અપક્ષીયતે વિનશ્યતીતિ
ષડ્વિકારવદેતત્સ્થૂલશરીરમ્ ।

૩.૨ સૂક્ષ્મશરીરં કિમ્ ?

અપઞ્ચીકૃતપઞ્ચમહાભૂતૈઃ કૃતં સત્કર્મજન્યં
સુખદુઃખાદિભોગસાધનં પઞ્ચજ્ઞાનેન્દ્રિયાણિ
પઞ્ચકર્મેન્દ્રિયાણિ પઞ્ચપ્રાણાદયઃ મનશ્ચૈકં
બુદ્ધિશ્ચૈકા એવં સપ્તદશાકલાભિઃ સહ યત્તિષ્ઠતિ
તત્સૂક્ષ્મશરીરમ્ ।

૩.૩ કારણશરીરં કિમ્ ?

અનિર્વાચ્યાનાદ્યવિદ્યારૂપં શરીરદ્વયસ્ય  કારણમાત્રં
સત્સ્વરૂપ અજ્ઞાનં નિર્વિકલ્પકરૂપં યદસ્તિ
તત્કારણશરીરમ્ ।
સત્સ્વરૂપાજ્ઞાનં નિર્વિકલ્પકરૂપં યદસ્તિ
તત્કારણશરીરમ્ ।

---

૪.૦ જ્ઞાનેન્દ્રિયાણિ
૪.૧ શ્રોત્રં ત્વક્ ચક્ષુઃ રસના ઘ્રાણમ્ ઇતિ પઞ્ચ જ્ઞાનેન્દ્રિયાણિ ।
૪.૧.૦ જ્ઞાનેન્દ્રિયદેવતાઃ
૪.૧.૧ શ્રોત્રસ્ય દિગ્દેવતા ।
૪.૧.૨ ત્વચો વાયુઃ ।
૪.૧.૩ ચક્ષુષઃ સૂર્યઃ ।
૪.૧.૪ રસનાયા વરુણઃ ।
૪.૧.૫ ઘ્રાણસ્ય અશ્વિનૌ ।
ઇતિ જ્ઞાનેન્દ્રિયદેવતાઃ ।
૪.૨ જ્ઞાનેન્દ્રિયવિષયાઃ
૪.૨.૧ શ્રોત્રસ્ય વિષયઃ શબ્દગ્રહણમ્ ।
૪.૨.૨ ત્વચો વિષયઃ સ્પર્શગ્રહણમ્ ।
૪.૨.૩ ચક્ષુષો વિષયઃ રૂપગ્રહણમ્ ।
૪.૨.૪ રસનાયા વિષયઃ રસગ્રહણમ્ ।
૪.૨.૫ ઘ્રાણસ્ય વિષયઃ ગન્ધગ્રહણમ્ ઇતિ ।

---

૫.૦ કર્મેન્દ્રિયાણિ
૫.૧ વાક્પાણિપાદપાયૂપસ્થાનીતિ  પઞ્ચકર્મેન્દ્રિયાણિ ।
૫.૧.૦ કર્મેન્દ્રિયદેવતાઃ
૫.૧.૧ વાચો દેવતા વહ્નિઃ ।
૫.૧.૨ હસ્તયોરિન્દ્રઃ ।
૫.૧.૩ પાદયોર્વિષ્ણુઃ ।
૫.૧.૪ પાયોર્મૃત્યુઃ ।
૫.૧.૫ ઉપસ્થસ્ય પ્રજાપતિઃ ।
ઇતિ કર્મેન્દ્રિયદેવતાઃ ।

૫.૨ કર્મેન્દ્રિયવિષયાઃ

૫.૨.૧ વાચો વિષયઃ ભાષણમ્ ।

૫.૨.૨ પાણ્યોર્વિષયઃ વસ્તુગ્રહણમ્ ।

૫.૨.૩ પાદયોર્વિષયઃ ગમનમ્ ।

૫.૨.૪ પાયોર્વિષયઃ મલત્યાગઃ ।

૫.૨.૫ ઉપસ્થસ્ય વિષયઃ આનન્દ ઇતિ ।

---

૬.૦ અવસ્થાત્રયમ્

અવસ્થાત્રયં કિમ્ ?

૬.૧ જાગ્રત્સ્વપ્નસુષુપ્ત્યવસ્થાઃ ।

---

૬.૧.૧ જાગ્રદવસ્થા કા ?

શ્રોત્રાદિજ્ઞાનેન્દ્રિયૈઃ શબ્દાદિવિષયૈશ્ચ જ્ઞાયતે

ઇતિ યત્ સા જાગ્રદવસ્થા ।

૬.૧.૧.૧ સ્થૂલ શરીરાભિમાની આત્મા વિશ્વ ઇત્યુચ્યતે ।

---

૬.૧.૨ સ્વપ્નાવસ્થા કેતિ ચેત્ ?

જાગ્રદવસ્થાયાં યદ્દૃષ્ટં યદ્ શ્રુતમ્

તજ્જનિતવાસનયા નિદ્રાસમયે યઃ પ્રપઞ્ચઃ પ્રતીયતે

સા સ્વપ્નાવસ્થા ।

૬.૧.૨.૧ સૂક્ષ્મશરીરાભિમાની આત્મા તૈજસ ઇત્યુચ્યતે ।

---

૬.૧.૩ અતઃ સુષુપ્ત્યવસ્થા કા ?

અહં કિમપિ ન જાનામિ સુખેન મયા નિદ્રાઽનુભૂયત ઇતિ

સુષુપ્ત્યવસ્થા ।

૬.૧.૩.૧ કારણશરીરાભિમાની આત્મા પ્રાજ્ઞ ઇત્યુચ્યતે ।

---

૭.૦ પઞ્ચકોશાઃ

૭.૧ પઞ્ચ કોશાઃ કે ?

અન્નમયઃ પ્રાણમયઃ મનોમયઃ વિજ્ઞાનમયઃ આનન્દમયશ્ચેતિ ।

૭.૧.૧ અન્નમયઃ કઃ ?
અન્નરસેનૈવ ભૂત્વા અન્નરસેનૈવ વૃદ્ધિં પ્રાપ્ય
અન્નરૂપપૃથિવ્યાં યદ્વિલીયતે તદન્નમયઃ કોશઃ
સ્થૂલશરીરમ્ ।
૭.૧.૨ પ્રાણમયઃ કઃ ?
પ્રાણાદ્યાઃ પઞ્ચવાયવઃ વાગાદીન્દ્રિયપઞ્ચકં
પ્રાણમયઃ કોશઃ ।
૭.૧.૩ મનોમયઃ કોશઃ કઃ ?
મનશ્ચ જ્ઞાનેન્દ્રિયપઞ્ચકં મિલિત્વા યો ભવતિ સ
મનોમયઃ કોશઃ ।
૭.૧.૪ વિજ્ઞાનમયઃ કઃ ?
બુદ્ધિજ્ઞાનેન્દ્રિયપઞ્ચકં મિલિત્વા યો ભવતિ સ
વિજ્ઞાનમયઃ કોશઃ ।
૭.૧.૫ આનન્દમયઃ કઃ ?
એવમેવ કારણશરીરભૂતાવિદ્યાસ્થમલિનસત્ત્વં
પ્રિયાદિવૃત્તિસહિતં સત્ આનન્દમયઃ કોશઃ ।
એતત્કોશપઞ્ચકમ્ ।

---

૮.૦ આત્મન્
મદીયં શરીરં મદીયાઃ પ્રાણાઃ મદીયં મનશ્ચ
મદીયા બુદ્ધિર્મદીયં અજ્ઞાનમિતિ સ્વેનૈવ જ્ઞાયતે
તદ્યથા મદીયત્વેન જ્ઞાતં કટકકુણ્ડલ ગૃહાદિકં
તદ્યથા મદીયત્વેન જ્ઞાતં કટકકુણ્ડલગૃહાદિકં
સ્વસ્મદ્ભિન્નં તથા પઞ્ચકોશાદિકં સ્વસ્મદ્ભિન્નં
મદીયત્વેન જ્ઞાતમાત્મા ન ભવતિ ॥

૮.૧ આત્મા તર્હિ કઃ ?
સચ્ચિદાનન્દસ્વરૂપઃ ।
૮.૧.૧ સત્કિમ્ ?
કાલત્રયેઽપિ તિષ્ઠતીતિ સત્ ।
૮.૧.૨ ચિત્કિમ્ ?
જ્ઞાનસ્વરૂપઃ ।

૮.૧.૩ આનન્દઃ કઃ ?

સુખસ્વરૂપઃ ।

૮.૨ એવં સચ્ચિદાનન્દસ્વરૂપં સ્વાત્માનં વિજાનીયાત્ ।

---

૯.૦ અથ ચતુર્વિંશતિતત્ત્વોત્પત્તિપ્રકારં વક્ષ્યામઃ ।

૯.૧ બ્રહ્માશ્રયા સત્ત્વરજસ્તમોગુણાત્મિકા માયા અસ્તિ ।

૯.૧.૧ તતઃ આકાશઃ સમ્ભૂતઃ ।

૯.૧.૨ આકાશાદ્ વાયુઃ ।

૯.૧.૩ વાયોસ્તેજઃ ।

૯.૧.૪ તેજસ આપઃ ।

૯.૧.૫ અદ્ભ્યઃ પૃથિવી ।

૯.૨ જ્ઞાનેન્દ્રિયસમ્ભૂતિ

એતેષાં પઞ્ચતત્ત્વાનાં મધ્યે

૯.૨.૧ આકાશસ્ય સાત્વિકાંશાત્ શ્રોત્રેન્દ્રિયં સમ્ભૂતમ્ ।

૯.૨.૨ વાયોઃ સાત્વિકાંશાત્ ત્વગિન્દ્રિયં સમ્ભૂતમ્ ।

૯.૨.૩ અગ્નેઃ સાત્વિકાંશાત્ ચક્ષુરિન્દ્રિયં સમ્ભૂતમ્ ।

૯.૨.૪ જલસ્ય સાત્વિકાંશાત્ રસનેન્દ્રિયં સમ્ભૂતમ્ ।

૯.૨.૫ પૃથિવ્યાઃ સાત્વિકાંશાત્ ઘ્રાણેન્દ્રિયં સમ્ભૂતમ્ ।

૯.૩ અન્તઃકરણ સમ્ભૂતિ

એતેષાં પઞ્ચતત્ત્વાનાં સમષ્ટિસાત્વિકાંશાત્

મનોબુદ્ધ્યહઙ્કાર ચિત્તાન્તઃકરણાનિ સમ્ભૂતાનિ ।

૯.૩.૧ સઙ્કલ્પવિકલ્પાત્મકં મનઃ ।

૯.૩.૨ નિશ્ચયાત્મિકા બુદ્ધિઃ ।

૯.૩.૩ અહંકર્તા અહંકારઃ ।

૯.૩.૪ ચિન્તનકર્તૃ ચિત્તમ્ ।

૯.૪ અન્તઃકરણદેવતાઃ

૯.૪.૧ મનસો દેવતા ચન્દ્રમાઃ ।

૯.૪.૨ બુદ્ધેર્બ્રહ્મા ।

૯.૪.૩ અહંકારસ્ય રુદ્રઃ ।

૯.૪.૪ ચિત્તસ્ય વાસુદેવઃ ।

૯.૫ કર્મેન્દ્રિતસમ્ભૂતિ

એતેષાં પઞ્ચતત્ત્વાનાં મધ્યે

૯.૫.૧ આકાશસ્ય રાજસાંશાત્ વાગિન્દ્રિયં સમ્ભૂતમ્ ।

૯.૫.૨ વાયોઃ રાજસાંશાત્ પાણીન્દ્રિયં સમ્ભૂતમ્ ।

૯.૫.૩ વન્હે રાજસાંશાત્ પાદેન્દ્રિયં સમ્ભૂતમ્ ।

૯.૫.૪ જલસ્ય રાજસાંશાત્ ઉપસ્થેન્દ્રિયં સમ્ભૂતમ્ ।

૯.૫.૫ પૃથિવ્યા રાજસાંશાત્ ગુદેન્દ્રિયં સમ્ભૂતમ્ ।

૯.૫.૬ એતેષાં સમષ્ટિરાજસાંશાત્ પઞ્ચપ્રાણાઃ સમ્ભૂતાઃ ।

૯.૬ પઞ્ચતત્ત્વસમ્ભૂતિ

૯.૬.૧ એતેષાં પઞ્ચતત્ત્વાનાં તામસાંશાત્
પઞ્ચીકૃતપઞ્ચતત્ત્વાનિ ભવન્તિ ।
પઞ્ચીકરણં કથમ્ ઇતિ ચેત્ ।

૯.૬.૨ એતેષાં પઞ્ચમહાભૂતાનાં તામસાંશસ્વરૂપમ્
એકમેકં ભૂતં દ્વિધા વિભજ્ય એકમેકમર્ધં પૃથક્
તૂષ્ણીં વ્યવસ્થાપ્ય અપરમપરમર્ધં ચતુર્ધા વિભજ્ય
સ્વાર્ધમન્યેષુ અર્ધેષુ સ્વભાગચતુષ્ટયસંયોજનં
કાર્યમ્ । તદા પઞ્ચીકરણં ભવતિ ।

૯.૬.૩ એતેભ્યઃ પઞ્ચીકૃતપઞ્ચમહાભૂતેભ્યઃ સ્થૂલશરીરં
ભવતિ ।

૯.૬.૪ એવં પિણ્ડબ્રહ્માણ્ડયોરૈક્યં સમ્ભૂતમ્ ।

---

૧૦.૦ જીવેશ્વર ભેદબુદ્ધિ

૧૦.૧ સ્થૂલશરીરાભિમાની જીવનામકં બ્રહ્મપ્રતિબિમ્બં ભવતિ ।
સ એવ જીવઃ પ્રકૃત્યા સ્વસ્માત્ ઈશ્વરં ભિન્નત્વેન જાનાતિ ।

૧૦.૨ અવિદ્યોપાધિઃ સન્ આત્મા જીવ ઇત્યુચ્યતે ।

૧૦.૩ માયોપાધિઃ સન્ ઈશ્વર ઇત્યુચ્યતે ।

૧૦.૪ એવં ઉપાધિભેદાત્ જીવેશ્વરભેદદૃષ્ટિઃ યાવત્પર્યન્તં તિષ્ઠતિ
તાવત્પર્યન્તં જન્મમરણાદિરૂપસંસારો ન નિવર્તતે ।

૧૦.૫ તસ્માત્કારણાન્ન જીવેશ્વરયોર્ભેદબુદ્ધિઃ સ્વીકાર્યા ।

---

૧૧.૦ જીવેશ્વરૈક્ય

નનુ સાહંકારસ્ય કિંચિદ્જ્ઞસ્ય જીવસ્ય નિરહંકારસ્ય

સર્વજ્ઞસ્ય ઈશ્વરસ્ય તત્ત્વમસીતિ મહાવાક્યાત્
કથમભેદબુદ્ધિઃ સ્યાદુભયોઃ
વિરુદ્ધધર્માક્રાન્તત્વાત્ । ઇતિ ચેન્ન ।

૧૧.૧ સ્થૂલસૂક્ષ્મશરીરાભિમાની ત્વંપદવાચ્યાર્થઃ ।
ઉપાધિવિનિર્મુક્તં સમાધિદશાસમ્પન્નં શુદ્ધં ચૈતન્યં
ત્વંપદલક્ષ્યાર્થઃ ।

૧૧.૨ એવં સર્વજ્ઞત્વાદિવિશિષ્ટ ઈશ્વરઃ તત્પદવાચ્યાર્થઃ ।
ઉપાધિશૂન્યં શુદ્ધચૈતન્યં તત્પદલક્ષ્યાર્થઃ ।

૧૧.૩ એવં ચ જીવેશ્વરયો ચૈતન્યરૂપેણાભેદે બાધકાભાવઃ ।

---

૧૨.૦ જીવન્મુક્તિઃ
એવં ચ વેદાન્તવાક્યૈઃ સદ્ગુરૂપદેશેન ચ સર્વેષ્વપિ ભૂતેષુ
યેષાં બ્રહ્મબુદ્ધિરુત્પન્ના તે જીવન્મુક્તાઃ ઇત્યર્થઃ ।

૧૨.૧ નનુ જીવન્મુક્તઃ કઃ ?
યથા દેહોઽહં પુરુષોઽહં બ્રાહ્મણોઽહં શૂદ્રોઽહમસ્મીતિ
દૃઢનિશ્ચયસ્તથા નાહં બ્રાહ્મણઃ ન શૂદ્રઃ ન પુરુષઃ
કિન્તુ અસંગઃ સચ્ચિદાનન્દસ્વરૂપઃ પ્રકાશરૂપઃ
સર્વાન્તર્યામી ચિદાકાશરૂપોઽસ્મીતિ દૃઢનિશ્ચય
રૂપોઽપરોક્ષજ્ઞાનવાન્ જીવન્મુક્તઃ ॥

૧૨.૨ બ્રહ્મૈવાહમસ્મીત્યપરોક્ષજ્ઞાનેન નિખિલકર્મબન્ધવિનિર્મુક્તઃ સ્યાત્ ।

---

૧૩.૦ કર્માણિ
કર્માણિ કતિવિધાનિ સન્તીતિ ચેત્

૧૩.૧ આગામિસઞ્ચિતપ્રારબ્ધભેદેન ત્રિવિધાનિ સન્તિ ।

૧૩.૧.૧ જ્ઞાનોત્પત્ત્યનન્તરં જ્ઞાનિદેહકૃતં પુણ્યપાપરૂપં કર્મ
યદસ્તિ તદાગામીત્યભિધીયતે ।

૧૩.૧.૨ સઞ્ચિતં કર્મ કિમ્ ?
અનન્તકોટિજન્મનાં બીજભૂતં સત્ યત્કર્મજાતં પૂર્વાર્જિતં
તિષ્ઠતિ તત્ સઞ્ચિતં જ્ઞેયમ્ ।

૧૩.૧.૩ પ્રારબ્ધં કર્મ કિમિતિ ચેત્ ।
ઇદં શરીરમુત્પાદ્ય ઇહ લોકે એવં સુખદુઃખાદિપ્રદં

યત્કર્મ તત્પ્રારબ્ધં
ભોગેન નષ્ટં ભવતિ પ્રારબ્ધકર્મણાં ભોગાદેવ ક્ષય ઇતિ ।
૧૩.૨ સઞ્ચિતં કર્મ બ્રહ્મૈવાહમિતિ નિશ્ચયાત્મકજ્ઞાનેન નશ્યતિ ।
૧૩.૩ આગામિ કર્મ અપિ જ્ઞાનેન નશ્યતિ કિંચ આગામિ કર્મણાં
નલિનીદલગતજલવત્ જ્ઞાનિનાં સમ્બન્ધો નાસ્તિ ।
૧૩.૪ કિંચ યે જ્ઞાનિનં સ્તુવન્તિ ભજન્તિ અર્ચયન્તિ તાન્પ્રતિ
જ્ઞાનિકૃતં આગામિ પુણ્યં ગચ્છતિ ।
૧૩.૫ યે જ્ઞાનિનં નિન્દન્તિ દ્વિષન્તિ દુઃખપ્રદાનં કુર્વન્તિ તાન્પ્રતિ
જ્ઞાનિકૃતં સર્વમાગામિ ક્રિયમાણં યદવાચ્યં કર્મ
પાપાત્મકં તદ્ગચ્છતિ । સુહૃદઃ પુણ્યકૃતં
દુર્હૃદઃ પાપકૃત્યં ગૃહ્ણન્તિ ।
૧૩.૬ તથા ચાત્મવિત્સંસારં તીર્ત્વા બ્રહ્માનન્દમિહૈવ પ્રાપ્નોતિ ।
તરતિ શોકમાત્મવિત્ ઇતિ શ્રુતેઃ ।
૧૩.૭ તનું ત્યજતુ વા કાશ્યાં શ્વપચસ્ય ગૃહેઽથ વા ।
જ્ઞાનસમ્પ્રાપ્તિસમયે મુક્તોઽસૌ વિગતાશયઃ । ઇતિ સ્મૃતેશ્ચ ।
ઇતિ તત્ત્વબોધપ્રકરણં સમાપ્તમ્ ।

Encoded and renumbered by Sunder Hattangadi

*tattvabodhaH*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*